अवस्था ८ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वेश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचनाख्या २१। इति त्रिकाण्डशेषः ॥

स्वाहापतिः, पुं, (स्वाहायाः पतिः।) अग्निः। इति धरणिः ॥

स्वाहाप्रियः, पुं, (स्वाहायाः प्रियः।) अग्निः। इति हलायुधः ॥

स्वाहाभुक्, [ज्] पुं, (स्वाहया भुङ्क्ते इति। भुज+क्विप्।) देवता। इति त्रिकाण्डशेषः ॥

स्वित्, व्य, प्रश्नः। (यथा, महाभारते।५।३५।१८।
"किं ब्राह्मणा वै श्रेयांसो दितिजाः खिद्विरोचन ॥")
वितर्कः। इत्यमरः। ३। ३। २४१॥ (यथा, मेघदूते। १४।
"अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ॥"
पादपूरणम्। इति मेदिनी ॥ प्रश्ने पृच्छायाम्। यथा, स्विदेकाकी विचरसि। वितर्को नानापक्षावमर्शः। स्वित् प्रश्ने च वितर्के च तथैव पादपूरणे। इति मेदिनी। इति भरतः ॥

स्विदितः, त्रि, स्वेदितः। यथा। विभाषायामादिकर्म्मणोः। भावे आदिकर्म्मणि चादितो निष्ठाया इड् वा स्यात्। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। ञि स्विदेति ञ्वादित्र स्वप्नन्ते ञिष्विदः साहचर्य्यात्। स्विद्यतेस्तु स्विदित इत्येव। इति सिद्धान्तकौमुदी ॥

स्विन्नः, त्रि, (स्विद्+क्तः।) घर्म्मयुक्तः। यथा। स्विन्नो घर्म्मार्पितो जनः। इति हलायुधः ॥ (यथा च कुमारे। ७। ७७।
"रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ॥"
पक्वम्। यथा,—
"अस्विन्नं वेणुगातं प्राहुः सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम् ॥"
इति श्राद्धतत्त्वधृतवशिष्ठवचनम् ॥

स्वीकारः, पुं, (अस्वस्य स्वस्य कारः करणम्। स्व+कृ+घञ्। अभूततद्भावे च्विः।) अङ्गीकारः। यथा,—
"सम्विदागूः प्रतिज्ञा च सन्धावाचव सङ्गरः। अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ संश्रवोऽङ्गारनियमोररीकाराश्च वा अपि ॥"
इति जटाधरः ॥
प्रतिज्ञानम्। इति शब्दरत्नावली ॥ अस्वं स्वं कुर्व्वन् व्यापारः। यथा। न च स्वीकारात् स्वत्वं स्वीकर्त्तुरेव दातृत्वापत्तेः। किञ्च। मनसा पात्रमुद्दिश्य इत्यादि शास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु अस्वस्य स्वीकारोऽभूततद्भावे च्विप्रत्ययात् अस्वं स्वं कुर्व्वन् व्यापारः भवति कथं तत्र प्रागेव स्वत्वम्। उच्यते उत्पन्नमपि स्वत्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन व्यवहाराङ्गं क्रियत इति स्वीकारशब्दार्थः। इति दायभागः ॥

स्वीयः, त्रि, (स्वस्यायमिति। स्व+छः।) स्वकीयः। आत्मीयः। यथा, स्कान्दे शिववाक्यम्।
"शूद्रः कर्म्माणि यो नित्यं स्वीयानि कुरुते प्रिये। तस्याहमर्च्चां गृह्णामि चन्द्रखण्डविभूषिते ! ॥"
इति तिथ्यादितत्त्वम् ॥

स्वीया, स्त्री, (स्वस्येयमिति। स्व+छः। टाप्।) नायिकाभेदः। तस्या लक्षणम्। स्वामिन्येवानुरक्ता पतिव्रता इति यावत्। अस्याश्चेष्टा स्वामिशुश्रूषा शीलरक्षा सरलता क्षमा च। सा च त्रिविधा। मुग्धा मध्या प्रगल्भा च। एताः सर्व्वा नायिका अवस्थाभेदेन प्रत्येकं नवविधा। प्रोषितभर्त्तृका खण्डिता कलहान्तरिता विप्रलब्धा उत्कण्ठिता वासकसज्जा स्वाधीनपतिका अभिसारिका प्रवत्स्यत्पतिका च। एताः प्रत्येकं उत्तममध्यमाधमभेदेन अष्टाविंशत्युत्तरशतनायिका भवन्ति। एतासां दिव्यादिव्यगणनाभेदेन चतुरशीत्युत्तरशतत्रयप्रकारा भवन्ति। तत्र प्रमाणं यथा। नायिका त्रिविधा। स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवानुरक्ता स्वीया। न च परिणीतायां परगामिन्यामतिव्याप्तिस्तत्र पतिव्रताया एव लक्ष्यत्वात्। तस्याः परगामितया परकीयत्वमेव समायाति। अस्याश्चेष्टा। भर्त्तुः शुश्रूषा। शीलसंरक्षणम्। आर्ज्जवम्। क्षमा च। यथा,—
"गतागतकुतूहलं नयनयोरपाङ्गावधि स्मितं कुलनतभ्रुवामधर एव विश्राम्यति। वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥"
अपि च।
"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम्। हास्यश्चाधरपल्लवावधि महामानोऽपि मौनावधि सर्व्वं स्वावधि नावधिः कुलभुवां प्रेम्णः परं केवलम् ॥"
अपि च।
"पदन्यासो गेहाद्बहिरिह फणारोहसमः स्वगेहादन्यत् यद्भवनमपरद्वीपतुलितम्। वचो लोकालभ्यं कृपणधनतुल्यं मृगदृशः पुमानन्यः कान्तादिह धुरिव चतुर्थीसमुदितः ॥"
स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्राङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा। सैव क्रमशो जातप्रश्रया विश्रब्धनवोढा। अस्याश्चेष्टा। क्रिया मनोहरा कोपे माईवं नवविभूषणे समीहा च ॥ ३ ॥
मुग्धा यथा,—
"आज्ञप्तं किल कामदेवधरणीपालेन काले शुभे वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेषोदयः। दृष्ट्वा खञ्जनचातुरी मुखरुचा सौधाकरी माधुरी वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्त्रते ॥"
अज्ञातयौवना यथा,—
"गौरात्तौरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति भ्रातुं करं न्यस्यति। सैवालाङ्कुरशङ्कया प्रतिमुखी रोमावली प्रोञ्छति अज्ञासीति मुहुः सखीमविदितश्रोणीभरा पृच्छति ॥"
ज्ञातयौवना यथा,—
"स्वयम्भुः शम्भुरम्भोजलोचने ! त्वत्पयोधरः। नखेन कस्य धन्यस्य चन्द्रचूड़ो भविष्यति ॥"*॥
नवोढ़ा यथा,—
"हस्ते धृतापि शयने विनिवेशितापि क्रोड़े कृतापि यतते बहिरेव गन्तुम्। जानीमहे नववधूरथ तस्य वश्या। यः पारदं स्थिरयितुं क्षमते करेण ॥"
यथा च।
"बलान्नीता पार्श्वे मुखमनुमुखं नैव कुरुते धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ। हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना नवोढ़ा वोढारं रमयति च सन्तापयति च ॥"*॥
विश्रब्धनवोढ़ा यथा,—
"दरमुकुलितनेत्रपालिनीवीनियमितबाहुलतोरुयुग्मबन्धम्। मरकलितकुचस्थलं नवोढ़ा स्वपिति समीपमुपेत्य कस्य यूनः ॥"*॥
समानलज्जामदना मध्या। एषैव चातिप्रश्रयादतिविश्रब्धनवोढ़ा। अस्याश्चेष्टा सागसि प्रेयसि धैर्य्ये वक्रोक्तिरधैर्य्ये परुषवाक्। यथा,—
"स्वापे प्रियाननविलोकनहानिरेव स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः। इत्थं सरोरुहमुखी परिचिन्तयन्ती स्वापं विधातुमपि हातुमपि प्रपेदे ॥"*॥
पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा। वेश्यायां कुलटायाञ्च पतिमात्रविषयत्वाभावात् न तत्रातिव्याप्तिः। अस्याश्चेष्टा रतिप्रीतिरानन्दादात्मसंमोहः। प्रथमं यथा,—
"समृष्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं निष्पीयाधरबिम्बमम्बरमपाकृत्य व्युदस्थाञ्जनाम्।